**Roll No.** ______________ **Code : 820143–$SA_1$(W)**

*कृपया जाँच कर लें कि इस प्रश्न पत्र में कुल 21 प्रश्न हैं और कुल 12 पृष्ठ हैं।*

# कक्षा-अष्टमी
# विषय-संस्कृतम्
# ( सङ्कलनात्मकं मूल्याङ्कनम्–I )

**निर्धारित–अवधिः–होरात्रयम्** **पूर्णाङ्काः 90**

***निर्देशा :***

1. *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*
2. *प्रतिखण्डम् उत्तराणि पृथक प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।*
3. *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एव लेखनीयानि।*
4. *प्रश्नपत्रे उत्तराणि न लेखनीयानि।*
5. *प्रश्नसङ्ख्या प्रश्नपत्रानुसारं अवश्यं लेखनीया।*
6. *खण्डसङ्ख्या अपि लेखनीया।*

## खण्डः-'क' ( अपठित-अवबोधनम् ) ( 5 )

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत– (5)

अस्माकं देशे बहूनि तीर्थस्थानानि सन्ति। तेषु वाराणसी अपि एकं प्रसिद्धं तीर्थस्थानम् अस्ति। इदं काशीनाम्ना अपि प्रसिद्धं वर्तते। एतत् पुण्यप्रदं प्राचीनतम् तीर्थस्थानं वर्तते। अनेकेषु प्राचीनग्रन्थेषु अस्य महिमा वर्णितः। स्कन्दपुराणस्य काशीखण्डे अस्याः वाराणस्याः विस्तरेण वर्णनं निहितम्। इयं नगरी गङ्गायाः पवित्रे तटे विराजमाना अस्ति। इदमेव भारतस्य सुप्रसिद्धधं पुरातनं विद्याकेन्द्रम् अपि अस्ति। अत्र प्राचीनकालात् पठनपाठनयोः परम्परा राजते। प्रतिसायं गङ्गातटे विधीयमाना गङ्गा-आरती श्रद्धालूनां प्रमुखम् आकर्षणं भवति।

प्रश्नाः

I. एकपदेन उत्तरत– (½×2=1)

(i) 'वाराणसी' केन नाम्ना अपि प्रसिद्धं वर्तते?

(ii) इयं नगरी कस्याः तटे विराजमाना अस्ति?

(II) एकवाक्येन उत्तरत– (1×2=2)

(क) वाराणस्याः विस्तरेण वर्णनं कस्मिन् निहितम्?

(ख) प्रतिसायं श्रद्धालूनां प्रमुखम् आकर्षणं किं भवति?

(III) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत– (½×4=2)

(क) 'तीर्थस्थानम्' इति पदस्य विशेषणपदं गद्यांशे किं प्रयुक्तम्?

(i) वाराणसी (ii) अपि

(iii) प्रसिद्धं (iv) अस्ति

(ख) 'नूतनम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(i) भारतम् (ii) प्रसिद्धं

(iii) विद्याकेन्द्रम् (iv) पुरातनम्

(ग) 'अनेकानि' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

(i) देशे (ii) बहूनि

(iii) तीर्थस्थानानि (iv) सन्ति

(घ) 'पुरातनं विद्याकेन्द्रम् अपि अस्ति' अस्मिन् वाक्यांशे अव्ययपदं किम्?

(i) विद्याकेन्द्रम् (ii) अपि

(iii) पुरातनम् (iv) अस्ति

**खण्डः-'ख' (रचनात्मक-कार्यम्)** **(15)**

2. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत– (1×5=5)



**मञ्जूषा**

| |
|---|
| उपवनस्य, द्विचक्रिकाः, कुक्कुरः, बालकाः, बालिका, जनाः, वृक्षाः, वाहनानि, वातावरणं, भ्रमन्ति, क्रीडन्ति, गच्छति, तिष्ठति, माता |

3. स्वमित्रं सुरेशं पर्वतयात्रार्थं निमन्त्रयितुम् अधोलिखिते पत्रे रिक्तस्थानानि मञ्जूषातः उचितपदानि चित्वा पूरयन्तु, पत्रं च उत्तरपुस्तिकायां लिखन्तु– (½x10=5)

छात्रावासः

(i) ..........................

तिथिः ..........................

प्रिय मित्र सुरेश!

(ii) .......................... नमोनमः।

अत्र (iii) ................................ तत्रास्तु। गतमासे आवयोः (iv) ............................... वार्तालापः अभवत्। विगतदिवसेषु एव अत्र (v) ............................ आरभत। तं द्रष्टुम् जनाः दूरतः (vi) ...................... आसन्। अत्रत्यानि प्राकृतिक दृश्यानि (vii) ................................ मनोरमाणि च सन्ति।

अहम् इच्छामि यत् अस्मिन् (viii) ......................... भवान् अपि अत्र आगत्य (ix) .......................... आनन्दम् अनुभवेत्।

अहं तव (x) .......................... करिष्यामि। भवदीय मित्रम्

राहुलः

**मञ्जूषा**

| |
|---|
| कुशलं, हिमपातः, अवसरे, पर्वतीयस्थलस्य, आगताः, प्रतीक्षां, आकर्षकाणि, सस्नेहं, नैनीतालम्, दूरभाषेण |

4. अधोलिखितं संवादं पठित्वा मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयत– (½x10=5)

नेता – श्रीमन्! मम पक्षे एव (i) ........................ कुरु।

मतदाता – किमर्थम् (ii) ........................एव मतं ददानि?

नेता – अहं जनकल्याणाय (iii) ........................ करिष्यामि।

मतदाता – किं त्वं (iv) ........................ वदसि?

नेता – आम्, मम सर्वं (v) .......................... एव अस्ति।

मतदाता – आतंकवाद-विषये (vi) ........................... किं कथयति?

नेता – आतंकवादस्य (vii) ........................ प्रयत्नं करिष्यामि।

मतदाता – प्रत्यत्नमेव (viii) ........................ किम्?

नेता –अहं यत् कथयामि (ix) .......................... करोमि।

मतदाता – सम्प्रति तु सर्वे नेतारः (x) .......................... कथयन्ति।

नेता – अहम् ईदृशः नास्मि।

मतदाता – शोभनम्।

**मञ्जूषा**

| |
|---|
| भवान्, एवमेव, करिष्यति, सत्यं, कार्यं, मतदानम्, तथैव, समूलनाशाय, तुभ्यम्, देशहिताय |

**खण्डः-'ग' (अनुप्रयुक्त-व्याकरणम्)** **(35)**

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत– (1×3=3)

(i) काकः शरणार्थं चटकायाः समीपम् अगच्छत्।

(ii) श्वः विद्यालये महा + उत्सवः भविष्यति।

(iii) महात्मा प्रतीक्षां कृत्वा स्वकुटीरम् आगच्छत्।

6. (अ) विकल्पेभ्यः उचितं शब्दरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत– (½×6=3)

(क) ........................ जलम् प्रदूषितं न करणीयम्।

(i) नद्यः (ii) नद्या

(iii) नद्याः (iv) नदीम्

(ख) माता ....................... पुस्तकम् आनयति।

(i) लतायै (ii) लताम्

(iii) लतया (iv) लतायाम्

(ग) ....................... रसम् स्वास्थ्यवर्द्धकं भवति।

(i) फलेभ्यः (ii) फलानि

(iii) फलैः (iv) फलानाम्

(घ) ......................... मम गृहम् आगच्छन्तु।

(i) भवान् (ii) भवन्तः

(iii) भवन्तौ (iv) भवन्तम्

(ङ) माता .......................... बालकं पश्यति।

(i) गच्छन् (ii) गच्छन्तौ

(iii) गच्छन्त: (iv) गच्छन्तम्

(च) रामायणे ...................... कथा अस्ति।

(i) रामाय (ii) रामात्

(iii) रामस्य (iv) रामेभ्य:

(आ) उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत– (1×3=3)

(क) वयम् इच्छाम: यत् ...................... कल्याणं भवतु।

(i) सर्वेभ्य: (ii) सर्वेषाम्

(iii) सर्वेषु (iv) सर्वान्

(ख) चटका कथयति–"अहं ...................... प्रतीक्षायाम् आसम्।"

(i) तव (ii) त्वम्

(iii) त्वया (iv) त्वत्

(ग) त्वम् ....................... विद्यालये पठसि?

(i) कस्य (ii) कस्मात्

(iii) कस्मिन् (iv) कस्याम्

7. (अ) कोष्ठके प्रदत्तसंख्यां संस्कृतपदेन रिक्तस्थानयो: लिखत– (1×2=2)

(क) मम कक्षायां ............................ (38) छात्रा: सन्ति।

(ख) सभायां .............................. (45) विद्वांस: तिष्ठन्ति।

(आ) उचितं संख्यावाचकं पदं विकल्पेभ्य: चित्वा लिखत– (½×2=1)

(क) वृक्षात् ....................... फलम् पतति।

(i) एक (ii) एकम्

(iii) एका (iv) एक:

(ख) उद्याने ........................ बालका: क्रीडन्ति।

(i) चत्वार: (ii) चतस्र:

(iii) चत्वारि (iv) चतुर्

8. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयत– (1×3=3)

(i) उपवने .......................... हरीतिमा अस्ति।

(ii) गृहात् ...................... वृक्षाः सन्ति।

(iii) त्वम् ....................... पाठं पठ।

**मञ्जूषा** | बहिः, सर्वत्र, अपि |

9. रेखाङ्कितपदेषु उपसर्गं संयोज्य पृथक् कृत्वा वा लिखत– (1×3=3)

(i) खगाः आकाशे उत् + पतन्ति।

(ii) एतानि आरक्षित क्षेत्राणि सन्ति।

(iii) चटका कथयति–अहं सर्वम् अव + गच्छामि।

10. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत– (1×5=5)

(i) जलेन विना जीवनं न सम्भवति।

(ii) नदीम् उभयतः जनाः तिष्ठन्ति।

(iii) बालाः मित्रैः सह क्रीडन्ति।

(iv) खगः नीडम् प्रति गच्छति।

(v) वृद्धः नेत्रेण काणः अस्ति।

11. अधोलिखितानां समस्तपदानां समासस्य नामानि लिखत– (1×3=3)

(i) जनसमूहः

(ii) पुष्पफलानि

(iii) शरणागतः

12. विकल्पेभ्यः उचितं धातुरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत– (1×5=5)

(क) वयं सदैव संस्कृतं .......................।

(i) पठाव (ii) पठाम

(iii) पठन्तु (iv) पठत

(ख) जनाः सदैव ईश्वरं .......................।

(i) स्मरेत् (ii) स्मरेत

(iii) स्मरेयुः (iv) स्मरेयम्

(ग) मनुष्याः सद्गुणैः ........................।

(i) शोभते (ii) शोभेते

(iii) शोभन्ते (iv) शोभे

(घ) आवां मिलित्वा ........................।

(i) स्थास्यामि (ii) स्थास्यावः

(iii) स्थास्यामः (iv) स्थास्यसि

(ङ) ह्यः मम जन्मदिवसः ........................।

(i) अस्ति (ii) आसीः

(iii) आसीत् (iv) आसम्

13. अधोलिखितेषु वाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत– (1×4=4)

(i) इतस्ततः <u>परिभ्रम्य</u> तौ एकं गृहम् अपश्यताम्।

(ii) सः व्यायामं (कृ + क्त्वा) विद्यालयं गच्छति।

(iii) <u>पठन्तः</u> छात्राः प्रश्नं पृच्छन्ति।

(iv) अतिथेः आगमनस्य सूचनां (प्र + आप् + ल्यप्) अपि सः बहिः न आगतः।

## खण्ड-'घ' (पठित-अवबोधनम्) (35)

14. अधोलिखितं गद्यांशं पठित्वा उत्तराणि लिखत– (5)

मम जलं पोषकशक्त्या परिपूर्णम् अस्ति। एतस्मात् कारणात् एव मम तटेषु वृक्षाणां, पादपानां वनौषधीनां च दुर्लभाः प्रजातयः उद्भवन्ति। एतानि स्थलानि 'आरक्षितक्षेत्राणि' सन्ति। प्राणिजीवनाय विशुद्धं पर्यावरणम् आवश्यकम् एव अस्ति। परन्तु अनेके जनाः यन्त्रालयानां विषमिश्रितरसायनपदार्थान् मम जले क्षिपन्ति मम जलं च प्रदूषितं कुर्वन्ति। एवं न करणीयम्।

प्रश्नाः

I. एकपदेन उत्तरत– (½×2=1)

(क) नद्याः जलम् कया परिपूर्णम् अस्ति?

(ख) जनाः किं प्रदूषितं कुर्वन्ति?

II. एकवाक्येन उत्तरत– (1×2=2)

(क) जनाः नद्याः जले किं क्षिपन्ति?

(ख) नद्याः तटेषु केषां प्रजातयः उद्भवन्ति?

III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत– (½×4=2)

(क) 'पर्यावरणम्' इति पदस्य विशेषणपदं किम्?

(i) जीवनाय (ii) विशुद्धं

(iii) एव (iv) अस्ति

(ख) 'अनेके जनाः मम जले ...................... क्षिपन्ति' अस्मिन् वाक्ये 'क्षिपन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(i) अनेके (ii) जनाः

(iii) मम (iv) जले

(ग) 'सुलभाः' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(i) वृक्षाणां (ii) पादपानां

(iii) दुर्लभाः (iv) प्रजातयः

(घ) 'मम तटेषु ...................... प्रजातयः उद्भवन्ति' इति वाक्ये 'मम' इति सर्वनामपदं कस्यै प्रयुक्तम्?

(i) नद्यै (ii) शक्त्यै

(iii) जात्यै (iv) जलाय

15. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत– (5)

यः पठति लिखति पश्यति परिपृच्छति पण्डितान् उपाश्रयति।
तस्य दिवाकरकिरणैः नलिनीदलम् इव विकास्यते बुद्धिः ॥

प्रश्नाः

I. एकपदेन उत्तरत– (½×2=1)

(i) मनुष्यः कान् उपाश्रयति?

(ii) नलिनीदलम् इव का विकास्यते?

II. एकवाक्येन उत्तरत– (1×2=2)

(i) कस्य बुद्धिः विकास्यते?

(ii) दिवाकरकिरणैः किं विकास्यते?

III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत– (½×4=2)

(क) 'रविः' इति अर्थे श्लोके किं पदं प्रयुक्तम्?

(i) नलिनी (ii) दलम्

(iii) दिवाकरः (iv) किरणैः

(ख) 'मूर्खान्' इति पदस्य किं विलोमपदं श्लोके प्रयुक्तम्?

(i) दिवाकरः (ii) पण्डितान्

(iii) बुद्धिः (iv) नलिनीदलम्

(ग) 'नलिनीदलम् इव विकास्यते बुद्धिः' इति वाक्ये अव्ययपदं किम्?

(i) नलिनीदलम् (ii) इव

(iii) विकास्यते (iv) बुद्धिः

(घ) श्लोकस्य प्रथमपङ्क्तौ कति क्रियापदानि सन्ति?

(i) चत्वारि (ii) पञ्च

(iii) षट् (iv) सप्त

16. अधोलिखितं संवादं पठित्वा प्रश्नानाम् उत्तराणि लिखत– (5)

सुमेधा – संस्कृतभाषायाः कति रुपाणि सन्ति?

प्रबुद्धः – संस्कृतभाषायाः द्वे रूपे स्तः। एकं वैदिकं संस्कृतम् द्वितीयं च लौकिकं संस्कृतम्।

प्रणवः – वैदिकसंस्कृतस्य किं प्रमुखं साहित्यम् अस्ति?

निष्ठा – चत्वारः वेदाः, ब्राह्मणग्रन्थाः, आरण्यक-ग्रन्थाः, उपनिषदः च वैदिकं साहित्यं कथ्यते।

सुमेधा – लौकिकसंस्कृतस्य आरम्भः कदा अभवत्?

विवेकः – वाल्मीकेः कालात् लौकिकसंस्कृतस्य प्रारम्भः मन्यते। अस्य कृतिः 'रामायणं' लौकिकसंस्कृतस्य आदिमः ग्रन्थः अस्ति।

प्रणवः – लौकिकसंस्कृतस्य अन्ये प्रमुखाः ग्रन्थाः के? के च तेषां प्रणेतारः?

प्रज्ञा – महाभारतं व्यासेन विरचितम्।

प्रश्नाः

I. एकपदेन उत्तरत– (½×2=1)

(i) वेदाः कति सन्ति?

(ii) व्यासेन किं विरचितम्?

II. एकवाक्येन उत्तरत– (1×2=2)

(क) लौकिकसंस्कृतस्य आदिमः ग्रन्थः कः अस्ति?

(ख) वैदिकसंस्कृतस्य प्रमुखं साहित्यं किम् अस्ति?

III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत– (½×4=2)

(क) 'ग्रन्थः इति पदस्य विशेषणपदं संवादे किं प्रयुक्तम्?

(i) कृतिः (ii) रामायणम्

(iii) आदिमः (iv) अस्ति

(ख) 'अलौकिकः' इति पदस्य संवादे किं विलोमपदं प्रयुक्तम्?

(i) वैदिक (ii) लौकिक

(iii) रूपाणि (iv) द्वितीयं

(ग) 'रचनाकाराः' इति अर्थे संवादे किं पदं प्रयुक्तम्?

(i) प्रमुखाः (ii) ग्रन्थाः

(iii) तेषां (iv) प्रणेतारः

(घ) 'के च तेषां प्रणेतारः' इति वाक्ये अव्ययपदं किम्?

(i) के (ii) च

(iii) तेषां (iv) प्रणेतारः

17. मञ्जूषायां प्रदत्तैः पदैः भावार्थे रिक्तस्थानानि पूरयित्वा भावार्थं लिखत– (1×4=4)

**(अ) विद्या ददाति विनयम्।**

भावार्थः – विद्या अर्थात् (i) ........................ मनुष्याय विनम्रतां यच्छति। जनाः विधया नम्रतां प्राप्नुवन्ति। अतः विद्यां प्राप्य (ii) ......................... मा कुरूत।

**(आ) न धर्मवृद्धेषु वयः समीक्ष्यते।**

भावार्थः –ये ज्ञानिनः सन्ति, गुणिनः सन्ति कर्त्तव्यपालने च सिद्धाः सन्ति तेषां ज्ञानस्य, (i) ........................ कर्त्तव्यपालनस्य शक्तेः एव महत्त्वं भवति। ते यदि (ii) ........................ अपि भवन्ति तथापि सम्मान योग्याः सन्ति।

**मञ्जूषा**

| |
|---|
| बालाः, ज्ञानम्, गुणानां, अभिमानं |

18. अधोलिखितौ श्लोकौ पठित्वा अन्वये रिक्तस्थानानि पूरयत– (½×8=4)

**( अ ) जाड्यं धियो हरति सिञ्चति वाचि सत्यं**
**मानोन्नतिं दिशति पापम् अपाकरोति।**
**चेतः प्रसादयति दिक्षु तनोति कीर्तिं**
**सत्सङ्गतिः कथय किं न करोति पुंसाम्॥**

अन्वयः – सत्सङ्गतिः धियः (i) ........................ हरति, वाचि सत्यं सिञ्चति, मानोन्नतिं (ii) ...................... पापम् अपाकरोति, चेतः प्रसादयति, दिक्षु (iii) .................... तनोति, कथय सत्सङ्गतिः (iv) ...................... किं न करोति?

**( आ ) सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु, मा कश्चित् दुःखभाग् भवेत्॥**

अन्वयः – सर्वे (i) ............................ भवन्तु, सर्वे (ii) ............................ सन्तु, सर्वे (iii) ......................... पश्यन्तु, कश्चित् (iv) ........................ मा भवेत्।

19. अधोलिखितानि वाक्यानि कथाक्रमानुसारं लिखत– (1×5=5)

(i) काकः चटकायै स्वगृहे शरणं न अयच्छत्।

(ii) अन्ते काकः लज्जितः अभवत्।

(iii) काकः चटका च द्वे मित्रे आस्ताम्।

(iv) ग्रीष्मकाले चटकायाः गृहं नष्टम् अभवत्।

(v) चटका काकस्य स्वागतं करोति।

20. अधोलिखितेषु कथनेषु रेखांकित पदानि आधृत्य प्रश्ननिर्माणं कुरूत– (1×5=5)

(i) शास्त्रं सर्वस्य लोचनम्।

(ii) छात्रैः प्रश्नोत्तरी आयोजिता।

(iii) जलस्य अभावात् कृषिः न भवति।

(iv) काकः चटका च सुन्दरगृहम् अपश्यताम्।

(v) क्रोधेन कार्यं न सिध्यति।

21. अधोलिखितानां पदानां समुचितार्थैः सह मेलनं कुरुत– (½×4=2)

| | |
|---|---|
| (i) बुद्धिः | श्रीः |
| (ii) कीर्तिम् | असत्यम् |
| (iii) लक्ष्मीः | मतिः |
| (iv) अनृतम् | यशः |